१.२ कर्मणि भावे वा प्रक्रिया

अधोनिर्दिष्टानि क्रियापदरूपाणि परिशीलयत -

कर्तरि	***कर्मणि***
पठति	पठ्यते
लिखति	लिख्यते
क्रीडति	क्रीड्यते
धावति	धाव्यते
निन्दति	निन्द्यते
खादति	खाद्यते

'पठ्यते'प्रभृतिषु कर्मणि (भावे वा) रूपेषु त्रयः भागाः - धातुः + य + ते इति ।

यथा - पठ् (धातुः) + य + ते   लिख् (धातुः) + य + ते
क्रीड् (धातुः) + य + ते   धाव् (धातुः) + य + ते
निन्द् + य + ते   खाद् + य + ते

अभ्यासः - १ *अधोनिर्दिष्टानां क्रियापदरूपाणां कर्मणिरूपं (भावेरूपं वा) लिखत ।*

उदा - रक्षति - रक्ष् + य + ते

१. अटति - ....+.......+......   २. पचति - ....+.......+........
३. चरति - ....+.......+......   ४. चर्वति - ....+.......+........
५. दशति - ....+.......+......   ६. विशति - ....+.......+........
७. स्पृशति - ....+.......+......   ८. नुदति - ....+.......+........
९. नमति - ....+.......+......   १०. त्यजति - ....+.......+...........

☛ कर्मणि भावे वा रूपं समानम् । उभयत्रापि 'यक्'(य) प्रत्ययः । अतः अस्मिन् पुस्तके रूपाभ्यासस्तरे सर्वत्र भावकर्मणोः अर्थभेदं मनसि अनिधाय एव अभ्यासाः प्रदत्ताः ।

अभ्यासः - २ *अधोनिर्दिष्टेषु रूपेषु धातुभागं* पृथक्कुरुत ।*

उदा - पठति - पठ्

१. जीवति - ....   २. वदति - ....
३. अर्हति - ....   ४. वसति - ....
५. स्नाति - ....   ६. नृत्यति - ....

* वस्तुतः धातवः अनुबन्धकंवर्णैः सह निर्दिश्यन्ते । यथा - 'मुच्लृ' 'पचष्' 'कुञ' इत्येवम् । अत्र तु तद्विषये अवधानम् अदत्त्वा प्रक्रियादशायां दृश्यमानं रूपमात्रं लिखत ।

७. रोदिति - .... ८. दोग्धि - ....

९. श्राम्यति - .... १०. शक्नोति - ....

११. आप्नोति - .... १२. रुणद्धि - ....

१३. भिनत्ति - .... १४. क्रीणाति - ....

१५. पुष्णाति - .... १६. सिद्ध्यति - ....

१७. सृजति - .... १८. युनक्ति - ....

१९. स्वपिति - .... २०. भुङ्क्ते - ....

अभ्यासः - ३ *अधोनिर्दिष्टानां कर्मणि (भावे वा) रूपं लिखत ।*

(कर्तरि धातुः आत्मनेपदी भवेत् चेदपि, कर्मणि रूपं तु पूर्वोक्तक्रमेण एव भवति इति अत्र स्पष्ट

उदा - १. यतते - यत् + य + ते = यत्यते ।

२. ईक्षते - ...... + ... + ... = ईक्ष्यते ।

३. त्वरते - ...... + ... + ... = ...

४. कम्पते - ...... + ... + ... = ...

५. याचते - ...... + ... + ... = ...

६. कल्पते - ...... + ... + ... = ...

७. लङ्घते - ...... + ... + ... = ...

८. ऊहते - ...... + ... + ... = ...

९. युध्यते - ...... + ... + ... = ...

१०. शोभते - ...... + ... + ... = ...

११. (प्र)यतते - ...... + ... + ... = ...

१२. लज्जते - ...... + ... + ... = ...

१३. बाधते - ...... + ... + ... = ...

१४. युङ्क्ते - ...... + ... + ... = ...

१५. क्रीणीते - ...... + ... + ... = ...

१६. शङ्कते - ...... + ... + ... = ...

१७. वर्धते - ...... + ... + ... = ...

१८. स्पर्धते - ...... + ... + ... = ...

१९. रमते -...... + ... + ... = ...

२०. सहते -...... + ... + ... = ...

इदम् अवधेयम्

'पिबति' इत्यस्य धातुः 'पा' । 'पिब' इति तु आदेशः । एवमेव कानिचन विशेषरूपाणि सम्भवन्ति । तानि अत्र सङ्गृहीतानि । तेषां धातवः अपि निर्दिष्टाः ।

- पिबति → पा - पीयते
- जिघ्रति → घ्रा - घ्रायते
- तिष्ठति → ष्ठा - स्थीयते
- गच्छति → गम् - गम्यते
- जानाति → ज्ञा - ज्ञायते
- धमति → ध्मा - ध्मायते
- मनति → म्ना - म्नायते
- यच्छति → दा - दीयते
- करोति → कृ - क्रियते
- पश्यति → दृश् - दृश्यते

अभ्यासः - ४ *अधोनिर्दिष्टानां विशेषधातुरूपाणां कर्मणि (भावे वा) रूपं लिखत ।*

१. प्रतिगच्छति - .... २. आगच्छति - ....

३. पिबति - .... ४. प्रयच्छति - ....

५. उपकरोति - .... ६. पश्यति - ....

७. आजिघ्रति - .... ८. तिष्ठति - ....

९. अधितिष्ठति - .... १०. उत्तिष्ठति - ....

११. सम्पिबति - .... १२. जानाति - ....

१३. अवजानाति - .... १४. अवगच्छति - ....

१५. धमति - .... १६. मनति - ....

विशेषः आकारान्तेषु पा-मा-स्था-गा-हा-दा-धा-धातवः ईकारं[1] प्राप्नुवन्ति ।

उदा - पा - पीयते, मा - मीयते, स्था - स्थीयते, गा - गीयते
हा - हीयते, दा - दीयते, धा - धीयते

अन्येषाम् आकारान्तानां धातूनां कर्मणि कोऽपि विकारः न भवति ।

अभ्यासः - ५ *अधोनिर्दिष्टानाम् आकारान्तधातूनां कर्मणि (भावे वा) रूपं लिखत ।*

उदा - तिष्ठति - स्था - स्थीयते ।

१. पिबति - .... २. याति - ....

१. सूत्रम् - घुमास्थागापाजहातिसां हलि (६.४.६६)

३. जिघ्रति - .... ४. ददाति - ....

५. निदधाति - .... ६. भाति - ....

७. जहाति - .... ८. प्रजायते - ....

९. स्नाति - .... १०. वाति - ....

११. ख्याति - .... १२. राति - ....

१३. लाति - .... १४. प्रजहाति - ....

विशेषः यदि धातुः इकारान्तः उकारान्तः वा भवति तर्हि इ-उकारयोः दीर्घः भवति ।[1]

उदा - जि - जयति - जीयते, क्षि - क्षयति - क्षीयते

हु - जुहोति - हूयते, भू - भवति - भूयते

यदि धातुः ईकारान्तः ऊकारान्तः वा स्यात् तर्हि कोऽपि विकारः न भवति ।

अभ्यासः - ६ *अधोनिर्दिष्टानां धातूनां कर्मणि (भावे वा) रूपाणि लिखत ।*

उदा - जयति - जि - जीयते

१. कौति (कु) .... २. क्रीणाति (क्री) ....

३. क्षयति (क्षि) .... ४. अधीते (इ) ....

५. क्षुवति (क्षु) .... ६. चिनोति (चि) ....

७. च्यवते (च्यु) .... ८. प्लवते (प्लु) ....

९. पवते (पू) .... १०. डयते (डी) ....

११. जयति (जि) .... १२. ज्रयति (ज्रि) ....

१३. स्मयते (स्मि) .... १४. द्रवति (द्रु) ....

१५. शृणोति (श्रु) .... १६. स्रवति (स्रु) ....

१७. सूते (सु) .... १८. श्रयति (श्रि) ....

१९. नौति (नु) .... २०. एति (इ) ....

२१. स्तौति (स्तु) .... २२. मीनाति (मी) ....

१. अकृत्सार्वधातुकयोर्दीर्घः (७.४.२५)